८५

गणेशस्तोत्र नं. ४६५

नं. ८५ ग-१

ग॰ ॐश्रीगणेशायनमः युधिष्ठिरउवाच श्रीकृष्णजग-
२ न्नाथयदुकृपांकुरुदयानिधे स्तोत्रंनब्रूहिमेनाथ्य-
भवेद्राज्यमकंटकं १ श्रीकृष्णउवाच महाराजराज
वक्ष्यामिनवाग्रेस्तोत्रमुत्तमं दारिद्र्यारिष्टानांनाश
शंविघ्ननाशनं २ कार्यसिद्धिकरंभुरायंराज्यलक्ष्मी
प्रसाधकं अष्टोत्तरशतनाम्नागणेशस्यप्रकीर्ति-
तं ३ ॐ अस्यश्रीगणपत्यष्टोत्तरशतनामस्तोत्र
स्य गणकऋषिस्त्रिष्टुप्छंदः श्रीगणपतिर्देव
ता गमितिवीजं सकलकामनासिद्ध्यर्थेपाठेवि
नियोगः अथध्यानं ॐलालासिंदूरवर्णांसुरवसन
मितंमोदकैर्मोदितास्यं हस्तेदंतंदधानंदिनकरस
दृशंतेजसोग्रंत्रिनेत्रं वामेरत्नाढ्यहस्तंवरपरशुध
रंस्मारवुसिंहासनस्थं गांगेयंमूर्त्तित्रिपुरवधकरं

विघ्नभक्ष्यं नमामि १ ॐ गणेशो विघ्नराजश्च विघ्न
नाशो गणाधिपः लम्बोदरो वक्रतुंडो विकटो गण
नायकः ५ गजास्यः सिद्धिदाता च खर्वो मूषक
वाहनः सुमुखो राजमान्यश्च शैलजानंददायकः
६ गुहाग्रजो महातेजाः कुंभो भक्तप्रियः प्रभुः
सिंदूराभो गणाध्यक्षस्त्रिनेत्रो धननायकः ७ वा
मनः शूर्पकर्णश्च धूम्रः शंकरनंदनः सर्वार्तिना
शनो विघ्नः कपिलो मोदकप्रियः ८ संकष्टनाश
नो देवः सुरासुरनमस्कृतः उमासुतः कृपालुश्च
सर्वज्ञः प्रियदर्शनः ९ हेरंबो रक्तनेत्रश्च स्थूलक
र्णिः प्रतापवान् सुखदः कार्यकर्त्ता च बुद्धिदो व्याधि
नाशकः १० इक्षुदंडप्रियः शूरः दुमासंकोचनाश
नः एकदंतो महोदरो वरदो गजकर्णकः ११ विना

ग.स्तो यको जगत्पूज्यः फलदो दीनवत्सलः विद्याप्रदो म
२ होत्साहो दुःखदौर्भाग्यनाशकः १२ शिष्टप्रियो भा
2 लचंद्रो नित्यसौभाग्यप्रदायकः दानशूरार्द्रगंडश्च
शांकरो विघ्नपाशिपः १३ रक्तांबरधरः श्रेष्ठः सर्वे
गोत्नाशभूषणः शत्रुध्वंसी च कर्वाङ्कुः सौम्यो दारि
द्र्यनाशनः १४ आदिपूज्यो दयाशीलो रक्तशुंडो
महोदरः सर्वगः सौख्यकर्त्ता च कान्तः पूज्यो बुधप्रि
यः १५ सर्वदेवमयः ख्यातो भुक्तिमुक्तिप्रदायकः
विद्यावान् दानशीलश्च वेदविन्मंत्रवित्सुधीः १६ त्र्य
विष्ण्वग्निर्हरनिर्हाणगम्यो मनिस्तुतः योगहो र
योगगम्यश्च भालनेत्रः शिवाप्रियः १७ सर्वमंत्रम
यः श्रीमान् सर्वेषां वश्यकारकः विघ्नध्वंसी सदा
हृष्टो भक्तानां फलदायकः १८ इदं स्तोत्रं गणेशस्य

ष्ठः पठेत्सादरं जनः तस्य सौख्यं भवेन्नित्यं कार्यसिद्धिश्च
जायते निश्चितं १९ राजद्वारे भये घोरे संग्रामे शत्रुसंकटे
पठेद्ध्रुवं शत्रुव्याधि विनाशाय निशायां चैव पठेन्नरः
२० सर्वरोगा विनश्यन्ति रोगास्तस्या पंचस्तव्या
श्रीकामः पठेत् आणिविद्याकामो त्रिसंध्यं तु २१ श्री
कामः पुत्रकामश्च रात्रौ प्रहरशेषके मध्याह्ने कीर्ति
कामश्च पठेन्नित्यं च मानवः २२ इति श्रीभ
विष्योत्तरपुराणे ... शान्तिनाम स्तोत्र
समाप्तम् श्रीमहागणपतये ... श्रेयस्तु ॥ ॥ ॥ १
ॐ श्रीभगवत्यै नमः ॐ सरस्वतीमया दृष्टावीणा
पुस्तकधारिणी हंसवाहनसंयुक्ता विद्यादानं
करोतु मे १ प्रथमं भारती नाम द्वितीयं च सरस्वती
तृतीयं शारदादेवी चतुर्थं हंसवाहनी २ पंचमी

स॰ स्तो॰ जगत्तं वंधयावंधस्तुवागीश्वरीति च कौमारी सप्तमीप्रोक्ता
३ अष्टमीब्रह्मचारिणी ३ नवमीबुद्धिदात्री च दशमीव
रदायिनी एकादशंचंडघंटाः द्वादशंभुवनेश्वरी ४
3 वाराही द्वादशनामानित्रिसंध्यं पठतेनरः सर्वासिद्धि
करीतस्य प्रसन्नापरमेश्वरी सदावसतिजिह्वाग्रेती ज्ञ—
ब्रह्मरूपासरस्वती: ब्रह्माणीत्वचश्रीचसरस्वतीनमो
स्तुते ६ इतिश्रीपद्मपुराणे सरस्वतीस्तोत्रं संपूर्णम् २
ॐश्रीरामायनमः ब्रह्मोवाच वंदेदेवंविदुमशेषसाक्षि
तिहेन्न त्वाम ध्यात्मज्ञानोभिरंतर्हृदिभाव्यम् हे
योहेयं हृदिहीनंपरमेकं सत्तामात्रंसर्वहृदिस्थं
दृशिरूपम् १ प्राणापानौ निश्चयबुद्ध्या हृदिरुद्ध्वा
छित्वासर्वंसंशयबंधंविषयौघान् पश्यंतीशंयंगत
मोहायतयस्तं वंदेरामंरत्नकिरीटंरविभासं २

मायातीतं माधवमाद्यं जगदादिं मानातीतं मो
हविनाशं मुनिवंद्यं योगिध्येयं योगविधानं परि
पूर्णं वंदे रामं रंजितलोकं रमणीयं ३ भावाभा
वप्रत्ययहीनं भवमुख्यैर्भोगासक्तैरर्चितपादां
बुजयुग्मं नित्यं शुद्धं बुद्धमनन्तं प्रणवाख्यम् वं
दे रामं वीरमशेषासुरदावम् ४ त्वं मे नाथो नाथि
तकार्याखिलकारी मानातीतो माधवरूपोऽखि
लधारी भक्त्यागम्यो भावितरूपो भवहारी योगा
भ्यासैर्भावितचेतःसहचारी ५ त्वामाद्यंतं लोक
ततीनां परमीशं लोकातीतं लौकिकमानैरधि
गम्यं भक्तिश्रद्धाभावसमेतैर्भजनीयं वंदे राममसु
दरमिंदीवरनीलं ६ कोवा ज्ञातुं त्वामतिमानं गत
मानं स्वानासक्तो माधव शक्तो मुनिमान्य वंदा

रा०स्तो० रघुराद्येकं दिनवंदारकवृंदं वंदे रामं भवमुखवंद्यं सु
४ खकंदं ७ नानाशास्त्रैर्वेदकदंबैः प्रतिपाद्यं नि
५ त्यानंदं निर्विषयज्ञानमनाद्यं मत्सेवार्थं मानुषभा
वं प्रतिपन्नं वंदे रामं मरकतवर्णं मधुरेशं ८ इत्यु
क्तो यः पठतीमं स्तवमाद्यं ब्राह्मब्रह्मलालनविधौ स म
त्यं भुवि मर्त्यैः रामं श्यामं कामितकामप्रदमीशं ध्या
ध्यात्वा ध्यातं पातकजालैर्विगतः स्यात् ९ इति श्री ३
रामस्तोत्रं समाप्तम् ॥ ॥
ॐ नमः शिवाय ॐ नागेंद्रहाराय त्रिलोचनाय भ
स्मांगरागाय महेश्वराय देवादिदेवाय दिगंबराय
तस्मै नकाराय नमः शिवाय १ मातंगचर्मांबर
भूषिताय समस्तगीर्वाणगणार्चिताय त्रैलोक्य
नाथाय पुरांतकाय तस्मै मकाराय नमः शिवाय

य २ ।शिवामुखांभोजविकासनाय दक्षस्ययज्ञ
स्यविनाशनाय चंद्रार्कवैश्वानरलोचनाय तस्मै
शिकारायनमः।शिवाय ३ वशिष्टकुंभोद्भवगौतमा
दि मुनींद्रवंद्यायगिरीश्वराय श्रीनीलकंठायवृ
षध्वजाय तस्मैवकारायनमःशिवाय ४ यक्ष
स्वरूपायजटाधराय पिनाकहस्तायसनातनाय
नित्यायशुद्धायनिरंजनाय तस्मैयकारायनमः
शिवाय ५ ।शिवपंचाक्षरस्तोत्रंयःपठेत्शिवसन्नि
धौ ।शिवलोकमवाप्नोति शिवेनसहमोदते ६
इतिश्रीशिवस्तोत्रंसमाप्तम् ॥ ॥ ४
ॐश्रीसूर्यायनमः ॐप्रातःस्मरामिखलुतत्सवि
तुर्वरेण्यं रूपंहिमंडलमृचोथतनुर्यजूंषि सामा
नियस्यकिरणाःप्रभवादिहेतुं ब्रह्माहरात्मकम

सू: स्तो· तद्ब्रह्म चिन्त्यरूपं १ प्रातर्नमामि तरणिं तनुवाङ्म
५ नोभिर्ब्रह्मेन्द्रपूर्वकसुरैर्नुतमर्चितं च वृष्टिप्रमोच
नविनिग्रहहेतुभूतं त्रैलोक्यपालनपरं त्रिगुणात्म
कं च २ प्रातर्भजामि सवितारमनन्तशक्तिं पा
पौघशत्रुभयरोगहरं परं च तं सर्वलोककलनात्म
ककालमूर्तिं गोकण्ठबंधनविमोचनमादिदेवं
३ श्लोकत्रयमिदं भानोः प्रातः प्रातः पठेत्तु यः स
र्वव्याधिविनिर्मुक्तः परमं सुखमाप्नुयात् ४ इति
श्रीसूर्यस्तोत्रं समाप्तम् शुभं भूयात् ५

